ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## पञ्चम काण्डे, षष्ठः प्रश्नः

# Table of Contents

5. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ...................................... 3

5.6 पञ्चम काण्डे षष्ठः प्रश्नः – उपानुवाक्याभिधानं........................... 3

================================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 5.कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

### 5.6 पञ्चम काण्डे षष्ठः प्रश्नः – उपानुवाक्याभिधानं

**TS 5.6.1.1 - Kramam**

हिरण्यवर्णाः शुचयः । हिरण्यवर्णा इति हिरण्य – वर्णाः । शुचयः पावकाः । पावका यासु । यासु जातः । जातः कश्यपः । कश्यपो यासु । यास्विन्द्रः । इन्द्र इतीन्द्रः ॥ अग्निम् ँयाः । या गर्भम् । गर्भम् दधिरे । दधिरे विरूपाः । विरूपास्ताः । विरूपा इति वि – रूपाः । ता नः । न आपः । आपः शम् । शꣳ स्योनाः । स्योना भवन्तु । भवन्त्विति भवन्तु ॥ यासाꣳ राजा । राजा वरुणः । वरुणो याति । याति मद्ध्ये । मद्ध्ये सत्यानृते । सत्यानृते अवपश्यन्न् । सत्यानृते इति सत्य – अनृते । अवपश्यन् जनानाम् । अवपश्यन्नित्यव – पश्यन् । जनानामिति जनानाम् ॥ मधुश्चुतः शुचयः । मधुश्चुत इति मधु – श्चुतः । शुचयो याः । याः पावकाः । पावकास्ताः । ता नः । न आपः । आपः शम् । शꣳ स्योनाः ।

स्योना भवन्तु । भवन्त्विति भवन्तु ॥ यासाम् देवाः । देवा दिवि ।
दिवि कृण्वन्ति । कृण्वन्ति भक्षम् । भक्षम् याः । या अन्तरिक्षे ।
अन्तरिक्षे बहुधा । बहुधा भवन्ति । बहुधेति बहु - धा ।
भवन्त्विति भवन्ति ॥ याः पृथिवीम् । पृथिवीम् पयसा ।
पयसोन्दन्ति । उन्दन्ति शुक्राः । **1 (50/56)**

**TS 5.6.1.2 - Kramam**

शुक्रास्ताः । ता नः । न आपः । आपः शम् । शꣳ स्योनाः ।
स्योना भवन्तु । भवन्त्विति भवन्तु ॥ शिवेन मा । मा चक्षुषा ।
चक्षुषा पश्यत । पश्यतापः । आपः शिवया । शिवया तनुवा ।
तनुवोप । उप स्पृशत । स्पृशत त्वचम् । त्वचम् मे । म इति मे ॥
सर्वाꣳ अग्नीन् । अग्नीꣳरप्सुषदः । अप्सुषदो हुवे । अप्सुषद
इतप्सु - सदः । हुवे वः । वो मयि । मयि वर्चः । वर्चो बलम् ।
बलमोजः । ओजो नि । नि धत्त । धत्तेति धत्त ॥ यददः ।
अदः सम्प्रयतीः । सम्प्रयतीरहौ । सम्प्रयतीरिति सम् - प्रयतीः ।
अहावनदत । अनदता हते । हत इति हते ॥ तस्मादा । आ नद्यः ।

नद्यो नाम । नाम स्थ । स्थ ता । ता वः । वो नामानि । नामानि सिन्धवः । सिन्धव इति सिन्धवः ॥ यत् प्रेषिताः । प्रेषिता वरुणेन । प्रेषिता इति प्र - इषिताः । वरुणेन ताः । ताः शीभम् । शीभꣳ समवल्गत । समवल्गत तत् । समवल्गतेति सम् - अवल्गत । **2 (50/54)**

**TS 5.6.1.3 - Kramam**

तदाप्नोत् । आप्नोदिन्द्रः । इन्द्रो वः । वो यतीः । यतीस्तस्मात् । तस्मादापः । आपो अनु । अनु स्थन । स्थनेति स्थन ॥ अपकामꣳ स्यन्दमानाः । अपकाममित्यप - कामम् । स्यन्दमाना अवीवरत । अवीवरत वः । वो हिकम् । हिकमिति हिकम् ॥ इन्द्रो वः । वः शक्तिभिः । शक्तिभिर् देवीः । शक्तिभिरिति शक्ति - भिः । देवीस्तस्मात् । तस्माद् वाः । वार्णाम । नाम वः । वो हितम् । हितमिति हितम् ॥ एको देवः । देवो अपि । अप्यतिष्ठत् । अतिष्ठथ् स्यन्दमानाः । स्यन्दमाना यथावशम् । यथावशमिति यथा - वशम् ॥ उदानिषुः । आनिषुर् महीः । महीरिति । इति तस्मात् । तस्मादुदकम् । उदकमुच्यते । उच्यत इत्युच्यते ॥ आपो भद्राः ।

भद्रा घृतम् । घृतमित् । इदापः । आप आसुः । आसुरग्नीषोमौ । अग्नीषोमौ बिभ्रति । अग्नीषोमावित्यग्नी – सोमौ । बिभ्रत्यापः । आप इत् । इत् ताः । ता इति ताः ॥ तीव्रो रसः । रसो मधुपृचाम् । मधुपृचामरङ्गमः । मधुपृचामिति मधु – पृचाम् । **3 (50/54)**

**TS 5.6.1.4 - Kramam**

अरङ्गम आ । अरङ्गम इत्यरम् – गमः । आ मा । मा प्राणेन । प्राणेन सह । प्राणेनेति प्र – अनेन । सह वर्चसा । वर्चसा गन्न् । गन्निति गन्न् ॥ आदित् । इत् पश्यामि । पश्याम्युत । उत वा । वा शृणोमि । शृणोम्या । आ मा । मा घोषः । घोषो गच्छति । गच्छति वाक् । वाङ् नः । न आसाम् । आसामित्यासाम् ॥ मन्ये भेजानः । भेजानो अमृतस्य । अमृतस्य तर्.हि । तर्.हि हिरण्यवर्णाः । हिरण्यवर्णा अतृपम् । हिरण्यवर्णा इति हिरण्य–वर्णाः । अतृपमँ यदा । यदा वः । व इति वः ॥ आपो हि । हिष्ठ । स्था मयोभुवः । मयोभुवस्ताः । मयोभुव इति मयः – भुवः । ता नः । न ऊर्जे । ऊर्जे दधातन । दधातनेति दधातन ॥ महे रणाय । रणाय चक्षसे । चक्षस इति चक्षसे ॥ यो वः । वः शिवतमः ।

शिवतमो रसः । शिवतम इति शिव - तमः । रस स्तस्य ।

तस्य भाजयत । भाजयतेह । इह नः । न इति नः ॥ उशतीरिव ।

इव मातरः ( ) । मातर इति मातरः ॥ तस्मा अरम् । अरम् गमाम ।

गमाम वः । वो यस्य । यस्य क्षयाय । क्षयाय जिन्वथ ॥ जिन्वथेति

जिन्वथ ॥ आपो जनयथ । जनयथा च । च नः । न इति नः ॥

दिवि श्रयस्व । श्रयस्वान्तरिक्षे । अन्तरिक्षे यतस्व । यतस्व पृथिव्या ।

पृथिव्या सम् । सम् भव । भव ब्रह्मवर्चसम् । ब्रह्मवर्चसमसि ।

ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । असि ब्रह्मवर्चसाय ।

ब्रह्मवर्चसाय त्वा । ब्रह्मवर्चसायेति ब्रह्म - वर्चसाय ।

त्वेति त्वा ॥ **4** (**72/79**)

*(उदन्ति-समवल्यात-मधुपृचाम्-मातरो-द्वाविꣳशतिश्च) (A1)*

**TS 5.6.2.1 - Kramam**

अपाम् ग्रहान् । ग्रहान् गृह्णाति । गृह्णात्येतत् । एतद् वाव । वाव

राजसूयम् । राजसूयम् ँयत् । राजसूयमिति राज - सूयम् । यदेते ।

एते ग्रहाः । ग्रहाः सवः । सवोऽग्निः । अग्निर् वरुणसवः ।

वरुणसवो राजसूयम् । वरुणसव इति वरुण - सवः ।

राजसूयमग्निसवः । राजसूयमिति राज–सूयम् । अग्निसवश्चित्यः ।
अग्निसव इत्यग्नि – सवः । चित्यस्ताभ्याम् । ताभ्यामेव ।
एव सूयते । सूयतेऽथो । अथो उभौ । अथो इत्यथो । उभावेव ।
एव लोकौ । लोकावभि । अभि जयति । जयति यः । यश्च ।
च राजसूयेन । राजसूयेनेजानस्य । राजसूयेनेति राज – सूयेन ।
ईजानस्य यः । यश्च । चाग्निचितः । अग्निचित आपः । अग्निचित
इत्यग्नि – चितः । आपो भवन्ति । भवन्त्यापः । आपो वै ।
वा अग्नेः । अग्नेर् भ्रातृव्याः । भ्रातृव्या यत् । यदपः । अपोऽग्नेः ।
अग्नेरधस्तात् । अधस्तादुपदधाति । उपदधाति भ्रातृव्याभिभूत्यै ।
उपदधातीत्युप – दधाति । भ्रातृव्याभिभूत्यै भवति । भ्रातृव्याभिभूत्या
इति भ्रातृव्य – अभिभूत्यै । भवत्यात्मना । आत्मना परा ।
पराऽस्य । अस्य भ्रातृव्यः । भ्रातृव्यो भवति । भवत्यमृतम् ।
अमृतम् ँवै । **5** (**50/59**)

**TS 5.6.2.2 - Kramam**

वा आपः । आपस्तस्मात् । तस्मादद्भिः । अद्भिरवतान्तम् ।
अद्भिरित्यत् – भिः । अवतान्तमभि । अवतान्तमित्यव – तान्तम् ।

अभिषिञ्चन्ति । सिञ्चन्ति न । नार्तिम् । आर्तिमा । आर्च्छति ।

ऋच्छति सर्वम् । सर्वमायुः । आयुरेति । एति यस्य । यस्यैताः ।

एता उपधीयन्ते । उपधीयन्ते यः । उपधीयन्त इत्युप - धीयन्ते ।

य उ । उ च । चैनाः । एना एवम् । एवम् वेँद । वेदान्नम् ।

अन्नम् वैँ । वा आपः । आपः पशवः । पशव आपः । आपोऽन्नम् ।

अन्नम् पशवः । पशवोऽन्नादः । अन्नादः पशुमान् । अन्नाद

इत्यन्न - अदः । पशुमान् भवति । पशुमानिति पशु - मान् ।

भवति यस्य । यस्यैताः । एता उपधीयन्ते । उपधीयन्ते यः ।

उपधीयन्त इत्युप - धीयन्ते । य उ । उ च । चैनाः । एना एवम् ।

एनम् वेँद । वेद द्वादश । द्वादश भवन्ति । भवन्ति द्वादश । द्वादश

मासाः । मासाः सम्वँथ्सरः । सम्वँथ्सरः सम्वँथ्सरेण ।

सम्वँथ्सर इति सम् - वथ्सरः । सम्वँथ्सरेणैव । सम्वँथ्सरेणेति

सम् - वथ्सरेण । एवास्मै । अस्मा अन्नम् । **6** (**50/58**)

**<u>TS 5.6.2.3 - Kramam</u>**

अन्नमव । अव रुन्धे । रुन्धे पात्राणि । पात्राणि भवन्ति ।

भवन्ति पात्रे । पात्रे वै । वा अन्नम् । अन्नमद्यते । अद्यते सयोनि ।

सयोन्येव । सयोनीति स–योनि । एवान्नम् । अन्नमव । अव रुन्धे ।
रुन्ध आ । आ द्वादशात् । द्वादशात् पुरुषात् । पुरुषादन्नम् ।
अन्नमत्ति । अत्त्यथो । अथो पात्रात् । अथो इत्यथो । पात्रान् न ।
न छिद्यते । छिद्यते यस्य । यस्यैताः । एता उपधीयन्ते । उपधीयन्ते
यः । उपधीयन्त इत्युप – धीयन्ते । य उ । उ च । चैनाः ।
एना एवम् । एवम् वेँद । वेद कुम्भाः । कुम्भाश्च । च कुम्भीः ।
कुम्भीश्च । च मिथुनानि । मिथुनानि भवन्ति । भवन्ति मिथुनस्य ।
मिथुनस्य प्रजात्यै । प्रजात्यै प्र । प्रजात्या इति प्र – जात्यै ।
प्र प्रजया । प्रजया पशुभिः । प्रजयेति प्र–जया । पशुभिर् मिथुनैः ।
पशुभिरिति पशु–भिः । मिथुनैर् जायते । जायते यस्य । यस्यैताः ।
एता उपधीयन्ते । उपधीयन्ते यः । उपधीयन्त इत्युप – धीयन्ते ।
य उ । उ च । **7** (**50/57**)

**TS 5.6.2.4 - Kramam**

चैनाः । एना एवम् । एवम् वेँद । वेद शुक् । शुग् वै । वा अग्निः ।
अग्निः सः । सोऽद्ध्वर्युम् । अद्ध्वर्युम् यँजमानम् ।

यजमानम् प्रजाः । प्रजाः शुचा । प्रजा इति प्र – जाः ।
शुचाऽर्पयति । अर्पयति यत् । यदपः । अप उपदधाति ।
उपदधाति शुचम् । उपदधातीत्युप – दधाति । शुचमेव । एवास्य ।
अस्य शमयति । शमयति न । नार्तिम् । आर्तिमा । आर्च्छति ।
ऋच्छत्यद्ध्वर्युः । अद्ध्वर्युर् न । न यजमानः । यजमानः शाम्यन्ति ।
शाम्यन्ति प्रजाः । प्रजा यत्र । प्रजा इति प्र – जाः । यत्रैताः ।
एता उपधीयन्ते । उपधीयन्तेऽपाम् । उपधीयन्त इत्युप – धीयन्ते ।
अपाम् वै । वा एतानि । एतानि हृदयानि । हृदयानि यत् । यदेताः ।
एता आपः । आपो यत् । यदेताः । एता अपः । अप उपदधाति ।
उपदधाति दिव्याभिः । उपदधातीत्युप – दधाति । दिव्याभिरेव ।
एवैनाः । एनाः सम् । स सृजति । सृजति वर्.षुकः ।
वर्.षुकः पर्जन्यः । पर्जन्यो भवति । **8 (50/55)**

**TS 5.6.2.5 - Kramam**

भवति यः । यो वै । वा एतासाम् । एतासामायतनम् ।
आयतनम् क्लृप्तिम् । आयतनमित्या – यतनम् । क्लृप्तिम् वेद ।
वेदायतनवान् । आयतनवान् भवति । आयतनवानित्यायतन – वान् ।

भवति कल्पते । कल्पतेऽस्मै । अस्मा अनुसीतम् । अनुसीतमुप ।

अनुसीतमित्यनु - सीतम् । उप दधाति । दधात्येतत् । एतद् वै ।

वा आसाम् । आसामायतनम् । आयतनमेषा ।

आयतनमित्या - यतनम् । एषा क्लृप्तिः । क्लृप्तिर् यः ।

य एवम् । एवम् वेद । वेदायतनवान् । आयतनवान् भवति ।

आयतनवानित्यायतन - वान् । भवति कल्पते । कल्पतेऽस्मै । अस्मै

द्वन्द्वम् । द्वन्द्वमन्याः । द्वन्द्वमिति द्वम्-द्वम् । अन्या उप । उप दधाति ।

दधाति चतस्रः । चतस्रो मद्ध्ये । मद्ध्ये धृत्यै । धृत्या अन्नम् ।

अन्नम् वै । वा इष्टकाः । इष्टका एतत् । एतत् खलु । खलु वै ।

वै साक्षात् । साक्षादन्नम् । साक्षादिति स - अक्षात् । अन्नम् यत् ।

यदेषः । एष चरुः । चरुर् यत् । यदेतम् । एतम् चरुम् ।

चरुमुपदधाति । उपदधाति साक्षात् ( ) । उपदधातीत्युप - दधाति ।

साक्षादेव । साक्षादिति स - अक्षात् । **9** (**50/59**)

**TS 5.6.2.6 - Kramam**

एवास्मै । अस्मा अन्नम् । अन्नमव । अव रुन्धे । रुन्धे मद्ध्यतः ।

मद्ध्यत उप । उप दधाति । दधाति मद्ध्यतः । मद्ध्यत एव ।

एवास्मै । अस्मा अन्नम् । अन्नम् दधाति । दधाति तस्मात् । तस्मान्
मद्ध्यतः । मद्ध्यतोऽन्नम् । अन्नमद्यते । अद्यते बार्.हस्पत्यः ।
बार्.हस्पत्यो भवति । भवति ब्रह्म । ब्रह्म वै । वै देवानाम् ।
देवानाम् बृहस्पतिः । बृहस्पतिर् ब्रह्मणा । ब्रह्मणैव । एवास्मै ।
अस्मा अन्नम् । अन्नमव । अव रुन्धे । रुन्धे ब्रह्मवर्चसम् ।
ब्रह्मवर्चसमसि । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । असि
ब्रह्मवर्चसाय । ब्रह्मवर्चसाय त्वा । ब्रह्मवर्चसायेति ब्रह्म–वर्चसाय ।
त्वेति । इत्याह । आह तेजस्वी । तेजस्वी ब्रह्मवर्चसी । ब्रह्मवर्चसी
भवति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । भवति यस्य । यस्यैषः ।
एष उपधीयते । उपधीयते यः । उपधीयत इत्युप – धीयते । य उ ।
उ च । चैनम् । एनमेवम् । एवम् वेँद । वेदेति वेद ॥ **10 (47/51)**

***(अमृत – मस्मै – जायते यस्यैता उपधीयन्ते य उ – पर्जन्य – उपदधाति साक्षाथ् – सप्तचत्वारिꣳशच्च) (A2)***

**TS 5.6.3.1 - Kramam**

भूतेष्टका उप । भूतेष्टका इति भूत – इष्टकाः । उप दधाति ।
दधात्यत्रात्र । अतात्र वै । अत्रात्रेत्यत्र – अत्र । वै मृत्युः ।

मृत्युर् जायते । जायते यत्रयत्र । यत्रयत्रैव । यत्रयत्रेति यत्र - यत्र ।
एव मृत्युः । मृत्युर् जायते । जायते ततः । तत एव । एवैनम् ।
एनमव । अव यजते । यजते तस्मात् । तस्मादग्निचित् । अग्निचिथ्
सर्वम् । अग्निचिदित्यग्नि-चित् । सर्वमायुः । आयुरेति । एति सर्वे ।
सर्वे हि । ह्यस्य । अस्य मृत्यवः । मृत्यवोऽवेष्टाः । अवेष्टास्तस्मात् ।
अवेष्टा इत्यव - इष्टाः । तस्मादग्निचित् । अग्निचिन् न ।
अग्निचिदित्यग्नि - चित् । नाभिचरितवै । अभिचरितवै प्रत्यक् ।
अभिचरितवा इत्यभि - चरितवै । प्रत्यगेनम् । एनमभिचारः ।
अभिचार स्तृणुते । अभिचार इत्यभि - चारः । स्तृणुते सूयते ।
सूयते वै । वा एषः । एष यः । योऽग्निम् । अग्निम् चिनुते ।
चिनुते देवसुवाम् । देवसुवामेतानि । देवसुवामिति देव - सुवाम् ।
एतानि हवी॑ꣳषि । हवी॑ꣳषि भवन्ति । भवन्त्येतावन्तः । एतावन्तो वै ।
वै देवानाम् । देवाना॑ꣳ सवाः । सवास्ते । त एव ।
एवास्मै । **11 (50/59)**

**TS 5.6.3.2 - Kramam**

अस्मै सवान् । सवान् प्र । प्र यच्छन्ति । यच्छन्ति ते । त एनम् ।
एन९ँ सुवन्ते । सुवन्ते सवः । सवोऽग्निः । अग्निर् वरुणसवः ।
वरुणसवो राजसूयम् । वरुणसव इति वरुण - सवः । राजसूयम्
ब्रह्मसवः । राजसूयमिति राज - सूयम् । ब्रह्मसवश्चित्यः । ब्रह्मसव
इति ब्रह्म - सवः । चित्यो देवस्य । देवस्य त्वा । त्वा सवितुः ।
सवितुः प्रसवे । प्रसव इति । प्रसव इति प्र - सवे । इत्याह ।
आह सवितृप्रसूतः । सवितृप्रसूत एव । सवितृप्रसूत इति
सवितृ - प्रसूतः । एवैनम् । एनम् ब्रह्मणा । ब्रह्मणा देवताभिः ।
देवताभिरभि । अभिषिञ्चति । सिञ्चत्यन्नस्यान्नस्य ।
अन्नस्यान्नस्याभि । अन्यस्यान्नस्येत्यन्नस्य-अन्नस्य । अभिषिञ्चति ।
सिञ्चत्यन्नस्यान्नस्य । अन्नस्यान्नस्यावरुद्ध्यै ।
अन्नस्यान्नस्येत्यन्नस्य - अन्नस्य । अवरुद्ध्यै पुरस्तात् ।
अवरुद्ध्या इत्यव - रुद्ध्यै । पुरस्तात् प्रत्यञ्चम् । प्रत्यञ्चमभि ।
अभिषिञ्चति । सिञ्चति पुरस्तात् । पुरस्ताद्धि । हि प्रतीचीनम् ।
प्रतीचीनमन्नम् । अन्नमद्यते । अद्यते शीर्.षतः । शीर्.षतोऽभि ।

अभिषिञ्चति । सिञ्चति शीर्.षतः । शीर्.षतो हि । ह्यन्नम् ।

अन्नमद्यते । अद्यत आ । आ मुखात् । मुखादन्ववस्रावयति ।

अन्ववस्रावयति मुखतः ।

अन्ववस्रावयतीत्यनु-अवस्रावयति । **12 (50/59)**

**<u>TS 5.6.3.3 - Kramam</u>**

मुखत एव । एवास्मै । अस्मा अन्नाद्यम् । अन्नाद्यम् दधाति ।

अन्नाद्यमित्यन्न-अद्यम् । दधात्यग्नेः । अग्नेस्त्वा । त्वा साम्राज्येन ।

साम्राज्येनाभि । साम्राज्येनेति साम् - राज्येन । अभिषिञ्चामि ।

सिञ्चामीति । इत्याह । आहैषः । एष वै । वा अग्नेः । अग्नेः

सवः । सवस्तेन । तेनैव । एवैनम् । एनमभि । अभिषिञ्चति ।

सिञ्चति बृहस्पतेः । बृहस्पतेस्त्वा । त्वा साम्राज्येन ।

साम्राज्येनाभि । साम्राज्येनेति साम् - राज्येन । अभिषिञ्चामि ।

सिञ्चामीति । इत्याह । आह ब्रह्म । ब्रह्म वै । वै देवानाम् । देवानाम्

बृहस्पतिः । बृहस्पतिर् ब्रह्मणा । ब्रह्मणैव । एवैनम् । एनमभि ।

अभिषिञ्चति । सिञ्चतीन्द्रस्य । इन्द्रस्य त्वा । त्वा साम्राज्येन ।

साम्राज्येनाभि । साम्राज्येनेति साम् - राज्येन । अभिषिञ्चामि ।

सिञ्चामीति । इत्याह । आहेन्द्रियम् । इन्द्रियमेव । एवास्मिन्न् ।
अस्मिन्नुपरिष्टात् । उपरिष्टाद् दधाति । दधात्येतत् ( ) ।
एतद् वै । **13 (50/54)**

**TS 5.6.3.4 - Kramam**

वै राजसूयस्य । राजसूयस्य रूपम् । राजसूयस्येति राज-सूयस्य ।
रूपम् ँयः । य एवम् । एवम् ँविद्वान् । विद्वानग्निम् । अग्निम्
चिनुते । चिनुत उभौ । उभावेव । एव लोकौ । लोकावभि । अभि
जयति । जयति यः । यश्च । च राजसूयेन । राजसूयेनेजानस्य ।
राजसूयेनेति राज - सूयेन । ईजानस्य यः । यश्च । चाग्निचितः ।
अग्निचित इन्द्रस्य । अग्निचित इत्यग्नि - चितः । इन्द्रस्य
सुषुवाणस्य । सुषुवाणस्य दशधा । दशधेन्द्रियम् । दशधेति
दश - धा । इन्द्रियम् ँवीर्यम् । वीर्यम् परा । पराऽपतत् । अपतत्
तत् । तद् देवाः । देवाः सौत्रामण्या । सौत्रामण्या सम् । समभरन्न् ।
अभरन्थ् सूयते । सूयते वै । वा एषः । एष यः । योऽग्निम् ।
अग्निम् चिनुते । चिनुतेऽग्निम् । अग्निम् चित्वा ।

चित्वा सौत्रामण्या । सौत्रामण्या यजेत । यजेतेन्द्रियम् । इन्द्रियमेव ।
एव वीर्यम् । वीर्य॑ सम्भृत्य । सम्भृत्यात्मन्न् । सम्भृत्येति
सम् – भृत्य । आत्मन् धत्ते । धत्त इति धत्ते ॥ **14** (**48/53**)

*(त एवा – न्ववस्रावयत्ये – त – दष्टाचत्वारि॑शच्च) (A3)*

**TS 5.6.4.1 - Kramam**

सजूरब्दः । सजूरिति स–जूः । अब्दोऽयावभिः । अयावभिः सजूः ।
अयावभिरित्ययाव – भिः । सजूरुषाः । सजूरिति स – जूः । उषा
अरुणीभिः । अरुणीभिः सजूः । सजूः सूर्य । सजूरिति स – जूः ।
सूर्य एतशेन । एतशेन सजोषौ । सजोषावश्विना । सजोषाविति
स – जोषौ । अश्विना द॑सोभिः । द॑सोभिः सजूः ।
द॑सोभिरितिद॑सः – भिः । सजूरग्निः । सजूरिति स – जूः ।
अग्निर् वैश्वानरः । वैश्वानर इडाभिः । इडाभिर् घृतेन । घृतेन
स्वाहा । स्वाहा सम्ँवथ्सरः । सम्ँवथ्सरो वै । सम्ँवथ्सर इति
सम् – वथ्सरः । वा अब्दः । अब्दो मासाः । मासा अयावाः ।
अयावा उषाः । उषा अरुणी । अरुणी सूर्यः । सूर्य एतशः ।
एतश इमे । इमे अश्विना । इमे इतीमे । अश्विना सम्ँवथ्सरः ।

सम्ँवथ्सरोऽग्निः । सम्ँवथ्सर इति सम् – वथ्सरः । अग्निर्
वैश्वानरः । वैश्वानरः पशवः । पशव इडा । इडा पशवः । पशवो
घृतम् । घृत९ँ सम्ँवथ्सरम् । सम्ँवथ्सरम् पशवः । सम्ँवथ्सरमिति
सम् – वथ्सरम् । पशवोऽनु । अनु प्र । प्र जायन्ते । जायन्ते
सम्ँवथ्सरेण । सम्ँवथ्सरेणैव । सम्ँवथ्सरेणेति सम् – वथ्सरेण ।
एवास्मै । अस्मै पशून् । पशून् प्र । प्र जनयति । जनयति
दर्भस्तम्बे । दर्भस्तम्बे जुहोति । दर्भस्तम्ब इति दर्भ – स्तम्बे ।
जुहोति यत् । यद् वै । **15 (50/63)**

**TS 5.6.4.2 - Kramam**

वा अस्याः । अस्या अमृतम् । अमृतम् ँयत् । यद् वीर्यम् । वीर्यम्
तत् । तद् दर्भाः । दर्भास्तस्मिन्न् । तस्मिन् जुहोति । जुहोति प्र ।
प्रैव । एव जायते । जायतेऽन्नादः । अन्नादो भवति । अन्नाद
इत्यन्न – अदः । भवति यस्य । यस्यैवम् । एवम् जुह्वति ।
जुह्वत्येताः । एता वै । वै देवताः । देवता अग्नेः । अग्नेः
पुरस्ताद्भागाः । पुरस्ताद्भागास्ताः । पुरस्ताद्भागा इति
पुरस्तात् – भागाः । ता एव । एव प्रीणाति । प्रीणात्यथो ।

अथो चक्षुः । अथो इत्यथो । चक्षुरेव । एवाग्नेः । अग्नेः पुरस्तात् ।

पुरस्तात् प्रति । प्रति दधाति । दधात्यनन्धः । अनन्धो भवति ।

भवति यः । य एवम् । एवम् वेद । वेदापः । आपो वै । वा इदम् ।

इदमग्रे । अग्रे सलिलम् । सलिलमासीत् । आसीथ् सः ।

स प्रजापतिः । प्रजापतिः पुष्करपर्णे । प्रजापतिरिति प्रजा - पतिः ।

पुष्करपर्णे वातः । पुष्करपर्ण इति पुष्कर - पर्णे । वातो भूतः ।

भूतोऽलेलायत् । अलेलायथ् सः । स प्रतिष्ठाम् । **16 (50/55)**

**<u>TS 5.6.4.3 - Kramam</u>**

प्रतिष्ठाम् न । प्रतिष्ठामिति प्रति-स्थाम् । नाविन्दत । अविन्दत सः ।

स एतत् । एतदपाम् । अपाम् कुलायम् । कुलायमपश्यत् । अपश्यत्

तस्मिन्न् । तस्मिन्नग्निम् । अग्निमचिनुत । अचिनुत तत् । तदियम् ।

इयमभवत् । अभवत् ततः । ततो वै । वै सः । स प्रति ।

प्रत्यतिष्ठत् । अतिष्ठद् याम् । याम् पुरस्तात् । पुरस्तादुपादधात् ।

उपादधात् तत् । उपादधादित्युप-अदधात् । तच्छिरः । शिरोऽभवत् ।

अभवथ् सा । सा प्राची । प्राची दिक् । दिग् याम् ।

याम् दक्षिणतः । दक्षिणत उपादधात् । उपादधाथ् सः ।

उपादधादित्युप – अदधात् । स दक्षिणः । दक्षिणः पक्षः ।

पक्षोऽभवत् । अभवथ् सा । सा दक्षिणा । दक्षिणा दिक् ।

दिग् याम् । याम् पश्चात् । पश्चादुपादधात् । उपादधात् तत् ।

उपादधादित्युप – अदधात् । तत् पुच्छम् । पुच्छमभवत् ।

अभवथ् सा । सा प्रतीची । प्रतिची दिक् । दिग् याम् । यामुत्तरतः ।

उत्तरत उपादधात् । उत्तरत इत्युत् – तरतः । उपादधाथ् सः ।

उपादधादित्युप – अदधात् । **17 (50/56)**

**TS 5.6.4.4 - Kramam**

स उत्तरः । उत्तरः पक्षः । उत्तर इत्युत् – तरः । पक्षोऽभवत् ।

अभवथ् सा । सोदीची । उदीची दिक् । दिग् याम् । यामुपरिष्टात् ।

उपरिष्टादुपादधात् । उपादधात् तत् । उपादधादित्युप – अदधात् ।

तत् पृष्ठम् । पृष्ठमभवत् । अभवथ् सा । सोद्ध्र्वा । ऊद्ध्र्वा दिक् ।

दिगियम् । इयम्ँवै । वा अग्निः । अग्निः पञ्चेष्टकः ।

पञ्चेष्टकस्तस्मात् । पञ्चेष्टक इति पञ्च – इष्टकः । तस्माद् यत् ।

यदस्याम् । अस्याम् खनन्ति । खनन्त्यभि । अभीष्टकाम् ।

इष्टकाम् तृन्दन्ति । तृन्दन्त्यभि । अभि शर्कराम् । शर्करा॒ सर्वा । सर्वा वै । वा इयम् । इयम् वयोभ्यः । वयोभ्यो नक्तम् । वयोभ्य इति वयः – भ्यः । नक्तम् दृशे । दृशे दीप्यते । दीप्यते तस्मात् । तस्मादिमाम् । इमाम् वया॑सि । वया॑सि नक्तम् । नक्तम् न । नाधि । अध्यासते । आसते यः । य एवम् । एवम् विद्वान् । विद्वानग्निम् । अग्निम् चिनुते । चिनुते प्रति । प्रत्येव ( ) । एव तिष्ठति । **18 (50/54)**

**<u>TS 5.6.4.5 - Kramam</u>**

तिष्ठत्यभि । अभि दिशः । दिशो जयति । जयत्याग्नेयः । आग्नेयो वै । वै ब्राह्मणः । ब्राह्मणस्तस्मात् । तस्माद् ब्राह्मणाय । ब्राह्मणाय सर्वासु । सर्वासु दिक्षु । दिक्ष्वर्द्धुकम् । अर्द्धुक॑ स्वाम् । स्वामेव । एव तत् । तद् दिशम् । दिशमनु । अन्वेति । एत्यपाम् । अपाम् वै । वा अग्निः । अग्निः कुलायम् । कुलायम् तस्मात् । तस्मादापः । आपोऽग्निम् । अग्नि॑ हारुकाः । हारुकाः स्वाम् । स्वामेव । एव तत् । तद् योनिम् । योनिम् प्र । प्र विशन्ति । विशन्तीति विशन्ति ॥ **19 (32/32)**

*(यद - लेलायथ् स - उत्तरत उपादधा - देव - द्वात्रिꣳशच्च)*
*(A4)*

**TS 5.6.5.1 - Kramam**

सम्ँवथ्सरमुख्यम् । सम्ँवथ्सरमिति सम् - वथ्सरम् । उख्यम् भृत्वा । भृत्वा द्वितीये । द्वितीये सम्ँवथ्सरे । सम्ँवथ्सर आग्नेयम् । सम्ँवथ्सर इति सम् - वथ्सरे । आग्नेयमष्टाकपालम् । अष्टाकपालम् निः । अष्टाकपालमित्यष्टा - कपालम् । निर् वपेत् । वपेदैन्द्रम् । ऐन्द्रमेकादशकपालम् । एकादशकपालम् वैश्वदेवम् । एकादशकपालमित्येकादश - कपालम् । वैश्वदेवम् द्वादशकपालम् । वैश्वदेवमिति वैश्व - देवम् । द्वादशकपालम् बार्.हस्पत्यम् । द्वादशकपालमिति द्वादश - कपालम् । बार्.हस्पत्यम् चरुम् । चरुम् वैष्णवम् । वैष्णवम् त्रिकपालम् । त्रिकपालम् तृतीये । त्रिकपालमिति त्रि - कपालम् । तृतीये सम्ँवथ्सरे । सम्ँवथ्सरेऽभिजिता । सम्ँवथ्सर इति सम् - वथ्सरे । अभिजिता यजेत । अभिजितेत्यभि - जिता । यजेत यत् । यदष्टाकपालः । अष्टाकपालो भवति । अष्टाकपाल इत्यष्टा-कपालः । भवत्यष्टाक्षरा ।

अष्टाक्षरा गायत्री । अष्टाक्षरेत्यष्टा - अक्षरा । गायत्र्याग्नेयम् ।
आग्नेयम् गायत्रम् । गायत्रम् प्रातस्सवनम् । प्रातस्सवनम्
प्रातस्सवनम् । प्रातस्सवनमिति प्रातः - सवनम् । प्रातस्सवनमेव ।
प्रातस्सवनमिति प्रातः - सवनम् । एव तेन । तेन दाधार ।
दाधार गायत्रीम् । गायत्रीम् छन्दः । छन्दो यत् । यदेकादशकपालः ।
एकादशकपालो भवति । एकादशकपाल इत्येकादश - कपालः ।
भवत्येकादशाक्षरा । एकादशाक्षरा त्रिष्टुक् ।
एकादशाक्षरेत्येकादश - अक्षरा । त्रिष्टुगैन्द्रम् । ऐन्दम् त्रैष्टुभम् ।
त्रैष्टुभम् माद्ध्यन्दिनम् । माद्ध्यन्दिन७ं सवनम् । सवनम्
माद्ध्यन्दिनम् । माद्ध्यन्दिनमेव । एव सवनम् । सवनम् तेन ।
तेन दाधार । दाधार त्रिष्टुभम् । त्रिष्टुभम् छन्दः । **20** (**50/65**)

**<u>TS 5.6.5.2 - Kramam</u>**

छन्दो यत् । यद् द्वादशकपालः । द्वादशकपालो भवति । द्वादशकपाल
इति द्वादश - कपालः । भवति द्वादशाक्षरा । द्वादशाक्षरा जगती ।
द्वादशाक्षरेति द्वादश - अक्षरा । जगती वैश्वदेवम् । वैश्वदेवम्
जागतम् । वैश्वदेवमिति वैश्व - देवम् । जागतम् तृतीयसवनम् ।

तृतीयसवनम् तृतीयसवनम् । तृतीयसवनमिति तृतीय–सवनम् ।
तृतीयसवनमेव । तृतीयसवनमिति तृतीय – सवनम् । एव तेन ।
तेन दाधार । दाधार जगतीम् । जगतीम् छन्दः । छन्दो यत् ।
यद् बार्.हस्पत्यः । बार्.हस्पत्यश्चरुः । चरुर् भवति । भवति ब्रह्म ।
ब्रह्म वै । वै देवानाम् । देवानाम् बृहस्पतिः । बृहस्पतिर् ब्रह्म ।
ब्रह्मैव । एव तेन । तेन दाधार । दाधार यत् । यद् वैष्णवः ।
वैष्णवस्त्रिकपालः । त्रिकपालो भवति । त्रिकपाल इति
त्रि–कपालः । भवति यज्ञः । यज्ञो वै । वै विष्णुः । विष्णुर् यज्ञम् ।
यज्ञमेव । एव तेन । तेन दाधार । दाधार यत् । यत् तृतीये । तृतीये
सम्ँवथ्सरे । सम्ँवथ्सरेऽभिजिता । सम्ँवथ्सर इति सम्–वथ्सरे ।
अभिजिता यजते । अभिजितेत्यभि – जिता । यजतेऽभिजित्यै ।
अभिजित्यै यत् । अभिजित्या इत्यभि – जित्यै । यथ् सम्ँवथ्सरम् ।
सम्ँवथ्सरमुख्यम् । सम्ँवथ्सरमिति सम् – वथ्सरम् ।
उख्यम् बिभर्ति । बिभर्तीमम् । इममेव । एव तेन । **21 (50/60)**

**TS 5.6.5.3 - Kramam**

तेन लोकम् । लोकꣳ स्पृणोति । स्पृणोति यत् । यद् द्वितीये ।
द्वितीये सम्ँवथ्सरे । सम्ँवथ्सरेऽग्निम् । सम्ँवथ्सर इति
सम् – वथ्सरे । अग्निम् चिनुते । चिनुतेऽन्तरिक्षम् । अन्तरिक्षमेव ।
एव तेन । तेन स्पृणोति । स्पृणोति यत् । यत् तृतीये । तृतीये
सम्ँवथ्सरे । सम्ँवथ्सरे यजते । सम्ँवथ्सर इति सम् – वथ्सरे ।
यजतेऽमुम् । अमुमेव । एव तेन । तेन लोकम् । लोकꣳ स्पृणोति ।
स्पृणोत्येतम् । एतम् ँवै । वै परः । पर आट्णारः । आट्णारः
कक्षीवान् । कक्षीवाꣳ॑ औशिजः । कक्षीवानिति कक्षी – वान् ।
औशिजो वीतहव्यः । वीतहव्यः श्रायसः । वीतहव्य इति
वीत – हव्यः । श्रायस स्त्रसदस्युः । त्रसदस्युः पौरुकुथ्स्यः ।
पौरुकुथ्स्यः प्रजाकामाः । पौरुकुथ्स्य इति पौरु – कुथ्स्यः ।
प्रजाकामा अचिन्वत । प्रजाकामा इति प्रजा – कामाः । अचिन्वत
ततः । ततो वै । वै ते । ते सहस्रꣳसहस्रम् । सहस्रꣳसहस्रम् पुत्रान् ।
सहस्रꣳसहस्रमिति सहस्रम् – सहस्रम् । पुत्रानविन्दन्त । अविन्दन्त
प्रथते । प्रथते प्रजया । प्रजया पशुभिः । प्रजयेति प्र – जया ।

पशुभिस्ताम् । पशुभिरिति पशु–भिः । ताम् मात्राम् । मात्रामाप्नोति ।
आप्नोति याम् । याम् ते । तेऽगच्छन्न् । अगच्छन्. यः । य एवम् ( ) ।
एवम् ँविद्वान् । विद्वानेतम् । एतमग्निम् । अग्निम् चिनुते ।
चिनुत इति चिनुते ॥ **22** (**54/63**)

*(दाधार त्रिष्टुभ – मिममेवै – वम् – चत्वारि च) (A5)*

**TS 5.6.6.1 - Kramam**

प्रजापतिरग्निम् । प्रजापतिरिति प्रजा – पतिः । अग्निमचिनुत ।
अचिनुत सः । स क्षुरपविः । क्षुरपविर् भूत्वा । क्षुरपविरिति
क्षुर – पविः । भूत्वाऽतिष्ठत् । अतिष्ठत् तम् । तम् देवाः । देवा
बिभ्यतः । बिभ्यतो न । नोप । उपायन्न् । आयन् ते । ते छन्दोभिः ।
छनोभिरात्मानम् । छन्दोभिरिति छन्दः–भिः । आत्मानम् छादयित्वा ।
छादयित्वोप । उपायन्न् । आयन् तत् । तच् छन्दसाम् । छन्दसाम्
छन्दस्त्वम् । छन्दस्त्वम् ब्रह्म । छन्दस्त्वमिति छन्दः – त्वम् ।
ब्रह्म वै । वै छन्दाꣳसि । छन्दाꣳसि ब्रह्मणः । ब्रह्मण एतत् । एतद्
रूपम् । रूपम् ँयत् । यत् कृष्णाजिनम् । कृष्णाजिनम् कार्ष्णी ।
कृष्णाजिनमिति कृष्ण – अजिनम् । कार्ष्णी उपानहौ ।

काष्र्णी इति काष्र्णी । उपानहावुप । उप मुञ्चते । मुञ्चते छन्दोभिः ।

छन्दोभिरेव । छन्दोभिरिति छन्दः - भिः । एवात्मानम् । आत्मानम्

छादयित्वा । छादयित्वाऽग्निम् । अग्निमुप । उप चरति । चरत्यात्मनः ।

आत्मनोऽहिꣳसायै । अहिꣳसायै देवनिधिः । देवनिधिर् वै ।

देवनिधिरिति देव - निधिः । वा एषः । एष नि । नि धीयते ।

धीयते यत् । यदग्निः । अग्निरन्ये । **23 (50/58)**

**TS 5.6.6.2 - Kramam**

अन्ये वा । वा वै । वै निधिम् । निधिमगुप्तम् । निधिमिति

नि - धिम् । अगुप्तम् ँविन्दन्ति । विन्दन्ति न । न वा । वा प्रति ।

प्रति प्र । प्र जानाति । जानात्युखाम् । उखामा । आ क्रामति ।

क्रामत्यात्मानम् । आत्मानमेव । एवाधिपाम् । अधिपाम् कुरुते ।

अधिपामित्यधि - पाम् । कुरुते गुप्त्यै । गुप्त्या अथो । अथो खलु ।

अथो इत्यथो । खल्वाहुः । आहुर् न । नाक्रम्या । आक्रम्येति ।

आक्रम्येत्या - क्रम्या । इति नैर्.ऋती । नैर्.ऋत्युखा ।

नैर्.ऋतीति नैः - ऋती । उखा यत् । यदाक्रामेत् ।

आक्रामेन् निर्.ऋत्यै । आक्रामेदित्या - क्रामेत् ।

निर्.ऋत्या आत्मानम् । निर्.ऋत्या इति निः – ऋत्यै । आत्मानमपि ।
अपि दद्ध्यात् । दद्ध्यात् तस्मात् । तस्मान् न । नाक्रम्या ।
आक्रम्या पुरुषशीर्.षम् । आक्रम्येत्या – क्रम्या । पुरुषशीर्.षमुप ।
पुरुषशीर्.षमिति पुरुष – शीर्.षम् । उप दधाति । दधाति गुप्त्यै ।
गुप्त्या अथो । अथो यथा । अथो इत्यथो । यथा ब्रूयात् ।
ब्रूयादेतत् । एतन् मे । मे गोपाय । गोपायेति । इति तादृक् ।
तादृगेव । एव तत् । तत् प्रजापतिः । **24 (50/60)**

**TS 5.6.6.3 - Kramam**

प्रजापतिर् वै । प्रजापतिरिति प्रजा – पतिः । वा अथर्वा ।
अथर्वाऽग्निः । अग्निरेव । एव दद्ध्यङ् । दद्ध्यङ्ङाथर्वणः ।
आथर्वणस्तस्य । तस्येष्टकाः । इष्टका अस्थानि । अस्थान्येतम् ।
एतꣳ ह । ह वाव । वाव तत् । तदृषिः । ऋषिरभ्यनूवाच ।
अभ्यनूवाचेन्द्रः । अभ्यनूवाचेत्यभि – अनूवाच । इन्द्रो दधीचः ।
दधीचो अस्थभिः । अस्थभिरिति । अस्थभिरित्यस्थ – भिः ।
इति यत् । यदिष्टकाभिः । इष्टकाभिरग्निम् । अग्निम् चिनोति ।

चिनोति सात्मानम् । सात्मानमेव । सात्मानमिति स – आत्मानम् ।
एवाग्निम् । अग्निम् चिनुते । चिनुते सात्मा । सात्माऽमुष्मिन् ।
सात्मेति स–आत्मा । अमुष्मिन् ँल्लोके । लोके भवति । भवति यः ।
य एवम् । एवम् ँवेद । वेद शरीरम् । शरीरम् ँवै । वा एतत् ।
एतदग्नेः । अग्नेर् यत् । यच् चित्यः । चित्य आत्मा ।
आत्मा वैश्वानरः । वैश्वानरो यत् । यच् चिते । चिते वैश्वानरम् ।
वैश्वानरम् जुहोति । जुहोति शरीरम् । शरीरमेव । एव स०स्कृत्य ।
स०स्कृत्याभ्यारोहति । **25 (50/55)**

**TS 5.6.6.4 - Kramam**

अभ्यारोहति शरीरम् । अभ्यारोहतीत्यभि – आरोहति । शरीरम् ँवै ।
वा एतत् । एतद् यजमानः । यजमानः सम् । स० स्कुरुते ।
कुरुते यत् । यदग्निम् । अग्निम् चिनुते । चिनुते यत् । यच् चिते ।
चिते वैश्वानरम् । वैश्वानरम् जुहोति । जुहोति शरीरम् । शरीरमेव ।
एव स०स्कृत्य । स०स्कृत्यात्मना । आत्मनाऽभ्यारोहति ।
अभ्यारोहति तस्मात् । अभ्यारोहतीत्यभि–आरोहति । तस्मात् तस्य ।
तस्य न । नाव । अव द्यन्ति । द्यन्ति जीवन्न् । जीवन्नेव । एव देवान् ।

देवानपि । अप्येति । एति वैश्वानर्या । वैश्वानर्यर्.चा । ऋचा पुरीषम् । पुरीषमुप । उप दधाति । दधातीयम् । इयम् ँवै । वा अग्निः । अग्निर् वैश्वानरः । वैश्वानरस्तस्य । तस्यैषा । एषा चितिः । चितिर् यत् । यत् पुरीषम् । पुरीषमग्निम् । अग्निमेव । एव वैश्वानरम् । वैश्वानरम् चिनुते । चिनुत एषा । एषा वै । वा अग्नेः ( ) । अग्नेः प्रिया । प्रिया तनूः । तनूर् यत् । यद् वैश्वानरः । वैश्वानरः प्रियाम् । प्रियामेव । एवास्य । अस्य तनुवम् । तनुवमव । अव रुन्धे । रुन्ध इति रुन्धे ॥ **26** (**60/62**)

***(अग्नि – स्तथ् – सꣳस्कृत्या – ग्ने – र्दश च) (A6)***

**TS 5.6.7.1 - Kramam**

अग्नेर् वै । वै दीक्षया । दीक्षया देवाः । देवा विराजम् । विराजमाप्नुवन्न् । विराजमिति वि – राजम् । आप्नुवन् तिस्रः । तिस्रो रात्रीः । रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्यात् त्रिपदा । त्रिपदा विराट् । त्रिपदेतित्रि – पदा । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति षट् । षड् रात्रीः । रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्यात् षट् ।

षड् वै । वा ऋतवः । ऋतवः सम्ँवथ्सरः । सम्ँवथ्सरः सम्ँवथ्सरः । सम्ँवथ्सर इति सम्–वथ्सरः । सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति सम् – वथ्सरः । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति दश । दश रात्रीः । रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्याद् दशाक्षरा । दशाक्षरा विराट् । दशाक्षरेति दश – अक्षरा । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति द्वादश । द्वादश रात्रीः । रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्याद् द्वादश । द्वादश मासाः । मासाः सम्ँवथ्सरः । सम्ँवथ्सरः सम्ँवथ्सरः । सम्ँवथ्सर इति सम् – वथ्सरः । सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति सम् – वथ्सरः । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति त्रयोदश । त्रयोदश रात्रीः । त्रयोदशेति त्रयः – दश । रात्रीर् दीक्षितः ।

दीक्षितः स्यात् । स्यात् त्रयोदश । त्रयोदश मासाः ।
त्रयोदशेति त्रयः–दश । 27 (50/67)

**TS 5.6.7.2 - Kramam**

मासाः सम्ँवथ्सरः । सम्ँवथ्सरः सम्ँवथ्सरः । सम्ँवथ्सर इति सम् – वथ्सरः । सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति सम् – वथ्सरः । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति पञ्चदश । पञ्चदश रात्रीः । पञ्चदशेति पञ्च – दश । रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्यात् पञ्चदश । पञ्चदश वै । पञ्चदशेति पञ्च – दश । वा अर्द्धमासस्य । अर्द्धमासस्य रात्रयः । अर्द्धमासस्येत्यर्द्ध – मासस्य । रात्रयोऽर्द्धमासशः । अर्द्धमासशः सम्ँवथ्सरः । अर्द्धमासश इत्यर्द्धमास–शः । सम्ँवथ्सर आप्यते । सम्ँवथ्सर इति सम् – वथ्सरः । आप्यते सम्ँवथ्सरः । सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति सम् – वथ्सरः । विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति । विराजमिति वि – राजम् । आप्नोति सप्तदश । सप्तदश रात्रीः ।

सप्तदशेति सप्त – दश । रात्रीर् दीक्षितः । दीक्षितः स्यात् ।
स्याद् द्वादश । द्वादश मासाः । मासाः पञ्च । पञ्चर्तवः । ऋतवः
सः । स सम्ँवथ्सरः । सम्ँवथ्सरः सम्ँवथ्सरः । सम्ँवथ्सर इति
सम् – वथ्सरः । सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति
सम् – वथ्सरः । विराड् विराजम् । विराडिति वि – राट् ।
विराजमाप्नोति । विराजमिति वि–राजम् । आप्नोति चतुर्वि॒ंशतिम् ।
चतुर्वि॒ंशति॒ं रात्रीः । चतुर्वि॒ंशतिमिति चतुः – वि॒ंशतिम् ।
रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्याच्चतुर्वि॒ंशतिः ।
चतुर्वि॒ंशतिरर्द्धमासाः । चतुर्वि॒ंशतिरिति चतुः – वि॒ंशतिः ।
अर्द्धमासाः सम्ँवथ्सरः । अर्द्धमासा इत्यर्द्ध – मासाः ।
सम्ँवथ्सरः सम्ँवथ्सरः । सम्ँवथ्सर इति सम् – वथ्सरः ।
सम्ँवथ्सरो विराट् । सम्ँवथ्सर इति सम् – वथ्सरः ।
विराड् विराजम् । विराडिति वि – राट् । विराजमाप्नोति ।
विराजमिति वि – राजम् । आप्नोति त्रि॒ंशतम् । त्रि॒ंशत॒ं रात्रीः ।
रात्रीर् दीक्षितः । दीक्षितः स्यात् । स्यात् त्रि॒ंशदक्षरा । **28 (50/74)**

**TS 5.6.7.3 - Kramam**

त्रि॒ꣳ॒शद॑क्षरा वि॒राट् । त्रि॒ꣳ॒शद॑क्ष॒रेति॑ त्रि॒ꣳ॒शत् – अ॒क्ष॒रा॒ । वि॒राड्

वि॒राज॑म् । वि॒राडिति॑ वि – राट् । वि॒राज॑माप्नोति । वि॒राज॒मिति॑

वि–राज॑म् । आ॒प्नो॒ति॒ मा॒स॑म् । मा॒स॑म् दीक्षि॒तः । दी॒क्षि॒तः स्यात् ।

स्या॒द् यः । यो मा॒सः । मा॒सः सः । स स॑म्ँवथ्स॒रः । स॒म्ँव॒थ्स॒रः

स॑म्ँवथ्स॒रः । स॒म्ँव॒थ्स॒र इति॑ सम्–व॒थ्स॒रः । स॒म्ँव॒थ्स॒रो वि॒राट् ।

स॒म्ँव॒थ्स॒र इति॑ सम् – व॒थ्स॒रः । वि॒राड् वि॒राज॑म् । वि॒राडिति॑

वि – राट् । वि॒राज॑माप्नोति । वि॒राज॒मिति॑ वि – राज॑म् ।

आ॒प्नो॒ति॒ च॒तु॑रः । च॒तु॑रो मा॒सः । मा॒सो दी॑क्षि॒तः । दी॒क्षि॒तः स्या॑त् ।

स्या॒च्च॒तु॑रः । च॒तु॒रो वै । वा ए॒तम् । ए॒तम् मा॒सः । मा॒सो वस॑वः ।

वस॑वोऽबिभरुः । अ॒बि॒भ॒रु॒स्ते । ते पृ॑थि॒वीम् । पृ॒थि॒वीमा ।

आऽज॑यन्न् । अ॒ज॒य॒न् गा॒य॒त्रीम् । गा॒य॒त्रीम् छन्दः । छन्दो॒ऽष्टौ ।

अ॒ष्टौ रु॒द्राः । रु॒द्रास्ते । तेऽन्तरि॑क्षम् । अ॒न्तरि॑क्षमा । आऽज॑यन्न् ।

अ॒ज॒य॒न् त्रि॒ष्टुभ॑म् । त्रि॒ष्टुभ॒म् छन्दः । छन्दो॒ द्वाद॑श । द्वाद॑शादि॒त्याः ।

आ॒दि॒त्यास्ते । ते दिव॑म् । दि॒वमा । आऽज॑यन्न् । अ॒ज॒य॒न् जग॑तीम् ।

जग॑ती॒म् छन्दः । छन्द॒स्तत॑ः । त॒तो वै । वै ते ( ) । ते व्या॒वृ॑तम् ।

